**दिनाङ्क : 09/03/2025** **सायम् - 06:20**

## आदौ मुख्यवार्ताः

- संसदः वित्तसङ्कल्पना-पत्रसत्रस्य द्वितीय-भागः अद्य पुनः प्रारब्धः ; राज्यसभायां रेलसंशोधन-विधेयके चर्चा जाता, लोकसभायां लेडिंग-विधेयकम् अनुमोदितम्।

- वानुअतु द्वीपराष्ट्रस्य प्रधानमन्त्रिणा ललितमोदिनः पासपोर्ट इति पारपत्रम् निरस्तम् कर्तुं आदेशः प्रदत्तः।

- भारतेन चीन-जापान-देशाभ्यां आगतेषु जलोपचार-रसायनेषु प्रतिटनमिते षडशीत्यधिक-नवशत-डॉलरमितं यावत् anti dumping इति शुल्कम् आरोपितम्।

- रूसदेशः अद्य द्वौ ब्रिटिश-राजनयिकौ गुप्तचर्यायाः आरोपे निष्कासितौ।

- महिलाप्रीमियरलीग इत्येतस्यां प्रतिस्पर्धायां, मुम्बई-इण्डियन्स्-दलम् अद्य सायङ्काले मुम्बय्यां गुजरात-जायण्ट्स-दलं सम्मुखीकरिष्यति।

-

## अथ वार्ता: विस्तरेण

### लोकसभा

लोकसभया अद्य गतवर्षस्य लेडिंग-बिल इति विधेयकं विचाराय अनुमोदनाय च कथितम्। इदं विधेयकं षट्पञ्चाशदधिक-अष्टादश-शततमस्य बिल ऑफ लेडिंग इति भारतीयाधिनियमं प्रतिस्थापयितुं प्रयतते यत् लेडिंग बिल इत्यस्य विधेयकस्य निर्गमनार्थं विधिसम्बद्ध-संरचना प्रददाति। विधेयकमिदं मालवाहकेन प्रेषकाय प्रदीयमानं पत्रं निर्दिशति। केन्द्रीयमन्त्री सर्बानन्द-सोनोवाल: सदने विधेयकं प्रस्तुतवान्।

### वित्तसंकल्पना पत्र

वित्तसंकल्पनापत्र-सत्रस्य द्वितीय-चरणस्य प्रथमे दिवसे अद्य संसद: द्वयो: सदनयो: कोलाहल: जात:। तमिलनाडुराज्ये राष्ट्रियशिक्षानीते: कार्यान्वयनविषये शिक्षामन्त्रिण: धर्मेन्द्रप्रधानस्य टिप्पण्यां डी.एम.के. इत्येतस्य तथा च काङ्ग्रेसदलस्य सांसद: विरोधप्रदर्शनं कृतवन्त:। कोलाहलमध्ये सदनं मध्याह्नं द्वादशवादनं यावत् स्थगितम्। प्रश्नकालावधौ डीएमके सांसदेन टी. सुमति उत वा थमिझाची थंगापांडियन् इत्यनेन तमिलनाडुराज्याय धनावण्टितस्य विषय:

उत्थापित:। मध्याह्न-द्वादशवादनस्य अनन्तरं सदनोपवेशनं पुन: प्रारब्धम्।

**<u>पीएम-मॉरीशस्</u>**

प्रधानमन्त्री श्रीनरेन्द्रमोदी द्विदिवसीययात्रायै श्व: मॉरीशस्-देशं सम्प्राप्स्यति। प्रधानमन्त्री मॉरीशस्-देशस्य राष्ट्रियदिवसावसरे आयोजयिष्यमाने समारोहे मुख्यातिथिरूपेण भागं भजिष्यति। प्रधानमन्त्रिण: मोदिन: इयं यात्रा तथा च मार्चमासस्य द्वादशे दिनाङ्के भविष्यमाणाय राष्ट्रियदिवस-समारोहाय सज्जता तीव्रतया प्रचलति। मॉरीशस्-देश: अष्टषष्ट्यधिक-नवदश-शततमे वर्षे ब्रिटिश-शासनात् स्वतन्त्रतां प्राप्नोत्। अस्मिन् देशे प्रतिवर्षे मार्चमासस्य द्वादशदिनाङ्के राष्ट्रियदिवसम् आमान्यते। पञ्चदशाधिक-द्विसहस्रतम-वर्षाद् अनन्तरं प्रधानमन्त्री नरेन्द्रमोदी द्वितीयवारं मॉरीशस्-देशस्य राष्ट्रियदिवससमारोहे मुख्यातिथिरूपेण सम्मिलितो भविष्यति। अद्य मॉरीशसदेशस्य राजधान्यां पोर्ट-लोइस इत्यत्र राष्ट्रियदिवसावसरे भविष्यमाणाय पथ-सञ्चलनाय सज्जता प्रचलति। भारतस्यापि एकं दलं मॉरीशस्-देशस्य राष्ट्रियदिवस-समारोहे भागं ग्रहीष्यति। सहैव

भारतीय-नौसेनायाः एकः पोतः अपि अस्मिन् अवसरे मॉरीशस्-देशं प्रति गच्छन् अस्ति।

## वानुअतु - ललित मोदी

वानुअतु द्वीपराष्ट्रस्य प्रधानमन्त्रिणा जोथम नापत इत्यनेन नागरिकता-योगाय भारतीयप्रीमियरलीग इत्यस्य पूर्वप्रमुखं ललितमोदिनं प्रति निर्गतं वानुअतु पासपोर्ट इति पारपत्रम् निरस्तं कर्तुं आदेशः प्रदत्तः। नापतेन वानुअतुनागरिकतां प्राप्तुं सौभाग्यं न तु अधिकारः इति बोधितम्। दक्षिणप्रशान्त-सागरस्य लघुद्वीपराष्ट्रस्य वानुअतुनगरस्य नागरिकतां ललितमोदिना प्राप्तम् इति वार्तावाहिनीसु प्रकाशितानन्तरम् एषः निर्णयः अभवत्। गतशुक्रवासरे विदेशमन्त्रालयेन पुष्टिः कृता यत् ललितमोदी लण्दननगरे भारतीयोच्चायोगे स्वस्य भारतीयपारपत्रं समर्पणार्थम् आवेदनं कृतवान् आसीत्। विदेशमन्त्रालयस्य प्रवक्त्रा रणधीर-जायसवालेन उक्तं यत् विद्यमान-नियमानुसारम् अनुरोधस्य समीक्षा भविष्यति। भारतं तस्य विरुद्धं विधि-प्रक्रियानुसारं कार्याचरणम् करिष्यति इति सः बोधितवान् । ललितमोदी IPL इत्यस्य प्रमुखत्वेन कार्यकाले कोटिरूप्यकाणां भ्रष्टाचारं

कृतवान् इत्यस्मिन् आरोपे सः वाञ्छितः अस्ति। सः दशाधिक-द्विसहस्रतमे वर्षे भारतं त्यक्त्वा लण्दन्-नगरे निवसति ।

**न्यूजीलैण्ड्-प्रधानमन्त्री**

न्यूजीलैण्ड-देशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन इत्येषः अस्य मासस्य षोडश-दिनाङ्कादारभ्य भारतस्य पञ्चदिवसीय-यात्रायां भविष्यति। तेन सह उच्चस्तरीयः प्रतिनिधिमण्डलोपि आगमिष्यति, यस्मिन् मन्त्रिणः, वरिष्ठाधिकारिणः, औद्योगिकनेतारः, वर्ताहराणां प्रतिनिधयः, भारतीयप्रवासि-समुदायस्य सदस्याः च सन्ति। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् यात्रावधौ प्रधानमन्त्री लक्सनः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह भारत-न्यूजीलैण्ड-देशयोः सम्बन्धानां विविधेषु पक्षेषु चर्चां करिष्यति। सः पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य दशमः रैसिनासंवादस्य उद्घाटनसत्रे मुख्यातिथिरूपेण अपि भागं गृह्णीयात्, मुख्यभाषणं च दद्यात्। श्रीलक्सनः राष्ट्रपति पदासीनया द्रौपदी मुर्मू वर्यया सहापि मेलनं करिष्यति।

## भारत-चीन जापान

भारतेन चीन-जापान-देशाभ्यां आयातेषु जलोपचारेषु प्रयुक्त-रसायनेषु पञ्चवर्षेभ्य: प्रतिटनमिते षडशीत्यधिक-नवशत-अमेरीकीय-डॉलरमितं यावत् एंटी-डम्पिंग इति शुल्कम् आरोपितम्।

## भारत-कम्बोडिया

अद्य कम्बोडिया-देशस्य सिम-रीपनगरे तृतीयः भारत-कम्बोडिया-विदेशकार्यालयपरामर्शः आयोजितः। परामर्श: मैत्रीपूर्णवातावरणे आयोजित:। यत्र राजनैतिकसहकार्यं, व्यापारः निवेशश्च, रक्षासुरक्षा, विकाससाहाय्यं, रिक्थसंरक्षणं, पुनर्स्थापनं, वाणिज्यदूतावासः, द्विपक्षीयसम्बन्धानां सम्पूर्णपक्षः इत्येतेषां विषयाणां समीक्षायाः अवसरः प्रदत्तः।

## जलशक्ति

केन्द्रीयजलशक्ति मन्त्री सी.आर. पाटिल: उक्तवान् यत् जलजीवनोपक्रपस्य कारणेन अशीति-प्रतिशताधिक-ग्रामीणपरिवारा: नलिकया जलं प्राप्नुवन्ति। राज्यसभायाम् एकस्य प्रश्नस्य प्रत्युत्तरे श्रीपाटिल: उक्तवान् यत्

नवदशाधिक-द्विसहस्रतमे वर्षे केवलं षोडश-प्रतिशत-ग्रामीण-परिवाराणां पार्श्वे नलजलस्य सौविध्यम् आसीत्।

इत: प्राक् संसद: बहि: वार्ताहरेण सह वार्तां कुर्वन् केन्द्रीयजलशक्ति मन्त्री सी.आर. पाटिल: उक्तवान् यत् गङ्गानद्या: जलं शुद्धं न तु मलिनम् इति।

## गडकरी

मार्गपरिवहन-राजमार्ग मन्त्री नितिन: गडकरी उक्तवान् यत् मार्गजालस्य परिष्कारं कृत्वा वस्तूनाम् उत्पादनव्ययं न्यूनीकुर्तं शक्यते, येन उद्योगेभ्य: उपभोक्तृभ्य: च लाभ: भविष्यति। अद्य नवदिल्ल्यां फेनक-अपचालक-प्रसाधक इत्येतेषु विषयेषु आधारितं सप्तम् अन्ताराष्ट्रियसम्मेलनं सम्बोधयन् असौ उक्तवान् यत् सूक्ष्मलघुमध्यमोद्यमेभ्य: अनया प्रगत्या लाभ: भविष्यति।

## रूस-ब्रिटेन-राजनयिका:

रूसदेशः अद्य द्वौ ब्रिटिशराजनयिकौ गुप्तचर्यायाः आरोपे सप्ताहद्वयोः आभ्यन्तरे देशात् बहिः गन्तुम् आदेशं दत्तवान्। रूसस्य सङ्घीयसुरक्षासेवा (FSB) इत्यनया कूटनीतिज्ञानाम् उपरि आरोपितं यत् ते मिथ्या निजदत्तांशं प्रदातुं, राष्ट्रियसुरक्षायाः कृते समाह्वनानि जनयितुं कार्याणि कुर्वन्तः आसन्

परञ्च प्रमाणं नास्ति। रूसीविदेश-मन्त्रालयेन ब्रिटिशदूतावासस्य एकम् अधिकारिणम् आहूय स्वक्षेत्रे "अघोषितब्रिटिश-गुप्तचर-पदाधिकारिणः" न सहते इति यूक्रेनदेशस्य विषये वर्धमानायाः चिन्तायाः मध्यं पूर्वं निष्कासनस्य अनन्तरक् एतत् पदक्षेपः कृतः। द्वाविंशत्यधिक-द्विसहस्रतम-वर्षात् आरभ्य रूस-पाश्चात्यराष्ट्रयोः मध्ये शतशः राजनयिकाः निष्कासिताः सन्ति।

## क्रिकेट

महिला-प्रीमियर-लीग-इत्यस्यां क्रिकेट-स्पर्धामालिकायां मुम्बय्याः ब्रेबोर्न-क्रीडाङ्गणे मुम्बई-इण्डियन्स्-दलं गुजरात-जायण्ट्स्-दलं सम्मुखीकरिष्यति। क्रीडायाः प्रसारणं भारतीयमानक-समयानुसारं सायं सार्धसप्तवादने भविष्यति।